# Shri shAkambharI tathA vanasha NkarI Sahasranamastotram

# શ્રીશાકમ્ભરી તથા વનશઙ્કરીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Shakambhari or VanashankarI Sahasranama Stotra

File name : shAkambharIvanashaNkarIsahasranAmastotra.itx

Category : sahasranAma, devii, shAkambharI, devI

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD, NA

Description-comments : Bhagavatistutimanjari pages 810-830, ed. Radhakrishnashastri

Latest update : August 11, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીશાકમ્ભરી તથા વનશઙ્કરીસહસ્રનામસ્તોત્રમ્

શાન્તા શારદચન્દ્રસુન્દરમુખી શાલ્યન્નભોજ્યપ્રિયા
    શાકૈઃ પાલિતવિષ્ટપા શતદૃશા શાકોલ્લસદ્વિગ્રહા ।
શ્યામાઙ્ગી શરણાગતાર્તિશમની શક્રાદિભિઃ શંસિતા
    શઙ્કર્યષ્ટફલપ્રદા ભગવતી શાકમ્ભરી પાતુ મામ્ ॥

શૂલં પાશકપાલચાપકુલિશાન્બાણાન્સૃણિં ખેટકાં
    શઙ્ખં ચક્રગદાહિખડ્ગમભયં ખટ્વાઙ્ગદણ્ડાન્ધરામ્ ।
વર્ષાભાવવશાદ્ધતાન્મુનિગણાન્શાકેન યા રક્ષતિ
    લોકાનાં જનનીં મહેશદયિતાં તાં નૌમિ શાકમ્ભરીમ્ ॥ ૧॥

કૈલાસશિખરાસીનં સ્કન્દં મુનિ ગણાન્વિતમ્ ।
પ્રણમ્ય શક્રઃ પપ્રચ્છ લોકાનાં હિતકામ્યયા ॥ ૨॥

શક્ર ઉવાચ -
સ્કન્દ સ્કન્દ મહાબાહો સર્વજ્ઞ શિવનન્દન ।
નામ્નાં સહસ્રમાચક્ષ્વ શાકમ્ભર્યાઃ સુસિદ્ધિદમ્ ॥ ૩॥

સ્કન્દ ઉવાચ -
યા દેવી શતવાર્ષિક્યામનાવૃષ્ટ્યાં સ્વદેહજૈઃ ।
શાકૈરબીભરત્સર્વાનૃષીન્ શક્ર શતં સમાઃ ॥ ૪॥

મહાસરસ્વતી સૈવ જાતા શાકમ્ભરી શિવા ।
નામ્નાં સહસ્રં તસ્યાસ્તે વક્ષ્યામિ શ્રુણુભક્તિતઃ ॥ ૫॥

ૐ અસ્ય શ્રીશાકમ્ભરીસહસ્રનામમાલામન્ત્રસ્ય મહાદેવઃ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શાકમ્ભરી દેવતા । સૌઃ બીજમ્ । ક્લીં શક્તિઃ ।
હ્રીં કીલકમ્ । મમ શ્રી શાકમ્ભરીપ્રસાદસિદ્ધ્યર્થે
તત્સહસ્રનામપારાયણે વિનિયોગઃ ।

કરન્યાસઃ ॥

ॐ સૌઃ ચામુણ્ડાયૈ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ॐ ક્લીં શતાક્ષ્યૈ તર્જનીભ્યાં નમઃ ।
ॐ હ્રીં શાકમ્ભર્યૈ મધ્યમાભ્યાં નમઃ ।
ॐ સૌઃ ચામુણ્ડાયૈ અનામિકાભ્યાં નમઃ ।
ॐ ક્લીં શતાક્ષ્યે કનિષ્ઠિકાભ્યાં નમઃ ।
ॐ હ્રીં શાકમ્ભર્યૈ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિન્યાસઃ ।

ॐ સૌઃ ક્લીં હ્રીં ॐ મન્ત્રેણ દિગ્બન્ધઃ । ઇતિ ॥

॥ ધ્યાનમ્ ॥

સૌવર્ણસિંહાસનસંસ્થિતાં શિવાં ત્રિલોચના ચન્દ્રકલાવતંસિકામ્ ।
શૂલં કપાલં નિજવામહસ્તયોસ્તદન્યયોઃ ખડ્ગમભીતિમુદ્રિકામ્ ॥

પાણ્યોર્દધાનાં મણિભૂષણાજ્જ્વલાં સુવાસસં માલ્યવિલેપનાઞ્ચિતામ્ ।
પ્રસન્નાવક્ત્રાં પરદેવતા મુદા ધ્યાયામિ ભક્ત્યા વનશઙ્કરીં હૃદિ ॥

લમિત્યાદિપઞ્ચપૂજા -
ॐ સૌઃ ક્લીં હ્રીં ॐ ।
ॐ શાકમ્ભર્યૈ નમઃ ।
હ્રીં શાકમ્ભર્યૈ નમઃ ।
ॐ હ્રીં શાકમ્ભર્યૈ નમઃ ।
સૌઃ ક્લીં હ્રીં શાકમ્ભર્યૈ નમઃ ।
ॐ સૌઃ ક્લીં હ્રીં શાકમ્ભર્યૈ નમઃ ।
ॐ સૌઃ ક્લીં હ્રીં શાકમ્ભર્યૈ નમઃ ॐ ।
ઇત્યેષુ ગુરૂપદિષ્ટં મન્ત્રં જપેત્ ।

॥ અથ સહસ્રનામસ્તોત્રમ્ ॥

ॐ શાકમ્ભરી શતાક્ષી ચ ચામુણ્ડા રક્તદન્તિકા ।
મહાકાલી મહાશક્તિર્મધુકૈટભનાશિની ॥ ૧॥

બ્રહ્માદિતેજઃ સમ્ભૂતા મહાલક્ષ્મીર્વરાનના ।
અષ્ટાદશભુજા સમ્રાણ્મહિષાસુરમર્દિની ॥ ૨॥

મહામાયા મહાદેવી સૃષ્ટિસ્થિત્યન્તકારિણી ।
કાન્તિઃ કામપ્રદા કામ્યા કલ્યાણી કરુણાનિધિઃ ॥

સિંહસ્થિતા નારસિંહી વૈષ્ણવી વિષ્ણુવલ્લભા ।
ભ્રામરી રક્તચામુણ્ડા રક્તાક્ષી રક્તપાયિની ॥ ૪॥

રક્તપ્રિયા સુરક્તોષ્ઠી રક્તબીજવિનાશિની ।
સુરક્તવસના રક્તમાલ્યા રક્તવિભૂષણા ॥ ૫॥

રક્તપાણિતલા રક્તનખી રક્તોત્પલાઙ્ઘ્રિકા ।
રક્તચન્દનલિપ્તાઙ્ગી રમણી રતિદાયિની ॥ ૬॥

સુરભિઃ સુન્દરી બાલા બગલા ભૈરવી સમિત્ ।
ચન્દ્રલામ્બા સુમઙ્ગલ્યા ભીમા ભયનિવારિણી ॥ ૭॥

જાગૃતિઃ સ્વપ્નરૂપા ચ સુષુપ્તિસુખરૂપિણી ।
તુર્યોન્મની ત્રિમાત્રા ચ ત્રયી ત્રેતા ત્રિમૂર્તિકા ॥ ૮॥

વિષ્ણુમાયા વિષ્ણુશક્તિર્વિષ્ણુજિહ્વા વિનોદિની ।
છાયા શાન્તિઃ ક્ષમા ક્ષુત્તૃટ્તુષ્ટિઃ પુષ્ટિર્ધૃતિર્ભૃતિઃ ॥ ૯॥

મતિર્મિતિર્નતિર્નીતિઃ સંયતિર્નિયતિ કૃતિઃ ।
સ્ફૂર્તિઃ કીર્તિઃ સ્તુતિર્જૂતિઃ પૂર્તિર્મૂર્તિર્નિજપ્રદા ॥ ૧૦॥

ત્રિશૂલધારિણી તીક્ષ્ણગદિની ખડ્ગધારિણી ।
પાશિની ત્રાસિની વામા વામદેવી વરાનના ॥ ૧૧॥

વામાક્ષી વારુણીમત્તા વામોરુર્વાસવસ્તુતા ।
બ્રહ્મવિદ્યા મહાવિદ્યા યોગિની યોગપૂજિતા ॥ ૧૨॥

ત્રિકૂટનિલયા નિત્યા કલ્પાતીતા ચ કલ્પના ।
કામેશ્વરી કામદાત્રી કામાન્તકકુટુમ્બિની ॥ ૧૩॥

કાલરાત્રિર્મહારાત્રિર્મોહરાત્રિશ્ચ દારુણા ।
નાનાદ્રુમલતાકીર્ણગિરિમધ્યનિવાસિની ॥ ૧૪॥

શાકપોષિતસર્વર્ષિઃ પાકશાસનપૂજિતા ।
ક્લેદિની ભેદિની ભ્રાન્તિર્ભીતિદા ભ્રાન્તિનાશિની ॥ ૧૫॥

ક્રાન્તિઃ સઙ્ક્રાન્તિરુત્ક્રાન્તિર્વિક્રાન્તિઃ ક્રાન્તિવર્જિતા ।
ડિણ્ડિમધ્વનિસંહૃષ્ટા ભેરીનાદવિનોદિની ॥ ૧૬॥

સુતન્ત્રીવાદનરતા સ્વરભેદવિચક્ષણા ।
ગાન્ધર્વશાસ્ત્રનિપૂણા નાટ્યશાસ્ત્રવિશારદા ॥ ૧૭॥

હાવભાવપ્રમાણજ્ઞા ચતુઃષષ્ટિકલાન્વિતા ।
પદવાક્યપ્રમાણાબ્ધિપારીણા વાદિભઙ્ગિની ॥ ૧૮॥

સર્વતન્ત્રસ્વતન્ત્રા ચ મન્ત્રશાસ્ત્રાબ્ધિપારગા ।
નાનાયન્ત્ર વિધાનજ્ઞા સૌગતાગમકોવિદા ॥ ૧૯॥

વૈખાનસાદ્યાગમજ્ઞા શૈવાગમ વિચક્ષણા ।
વામદક્ષિણમાર્ગજ્ઞા ભૈરવાગમભેદવિત્ ॥ ૨૦॥

પઞ્ચાયતનતત્ત્વજ્ઞા પઞ્ચામ્નાયપ્રપઞ્ચવિત્ ।
રાજરાજેશ્વરી ભટ્ટારિકા ત્રિપુરસુન્દરી ॥ ૨૧॥

મહાદક્ષિણકાલી ચ માતઙ્ગી મદ્યમાંસભુક્ ।
લુલાયબલિસન્તુષ્ટા મેષચ્છાગબલિપ્રિયા ॥ ૨૨॥

દીપિકાક્રીડનરતા ડમડ્ડમરુનાદિની ।
મહાપ્રદીપિકાદેહલેહનાદ્ભુતશક્તિદા ॥ ૨૩॥

નિજાવેશવદુન્મત્તભક્તોક્ત ફલદાયિની ।
ઉદોઉદોમહાધ્વાન શ્રવણાસક્તમાનસા ॥ ૨૪॥

ચૌડેશ્વરી ચૌડવાદ્યપ્રવાદનપરાયણા ।
કપર્દમાલાભરણા કપર્દિપ્રાણવલ્લભા ॥ ૨૫॥

નગ્નસ્ત્રીવીક્ષણરતા નગ્નિકોદ્ભિન્નયૌવના ।
બાલા બદરવક્ષોજા મધ્યા બિલ્વફલસ્તની ॥ ૨૬॥

નારિકેલસ્તની પ્રૌઢા પ્રગલ્ભા ચ ઘટસ્તની ।
કાત્યાયની નમ્રકુચા પ્રૌઢાદ્ભુતપરાક્રમા ।
કદલીવનમધ્યસ્થા કદમ્બવનવાસિની ॥ ૨૭॥

નિજોપકણ્ઠસમ્પ્રાપ્તનદીમાહાત્મ્યવર્ધિની ।
કાવેરી તામ્રપર્ણી ચ કામાક્ષી કામિતાર્થદા ॥ ૨૮॥

મૂકામ્બિકા મહાશક્તિઃ શ્રીશૈલભ્રમરામ્બિકા ।
જોગલામ્બા જગન્માતા માતાપુરનિવાસિની ॥ ૨૯॥

જમદગ્નિપ્રિયા સાધ્વી તાપસીવેષધારિણી ।
કાર્તવીર્યમુખાનેકક્ષત્રવિધ્વંસકારિણી ॥ ૩૦॥

નાનાવતારસમ્પન્ના નાનાવિધચરિત્રકૃત્ ।
કરવીરમહાલક્ષ્મીઃ કોલ્હાસુરવિનાશિની ॥ ૩૧॥

નાગલિઙ્ગભગાઙ્કાઢ્યમૌલિઃ શક્રાદિસંસ્તુતા ।
દુર્ગમાસુરસંહર્ત્રી દુર્ગાઽનર્ગલશાસના ॥ ૩૨॥

નાનાવિધભયત્રાત્રી સુત્રામાદિસુધાશના ।
નાગપર્યંકશયના નાગી નાગાઙ્ગનાર્ચિતા ॥ ૩૩॥

હાટકાલઙ્કૃતિમતી હાટકેશસભાજિતા ।
વાગ્દેવતાસ્ફૂર્તિદાત્રી ત્રાતવાગ્બીજજાપકા ॥ ૩૪॥

જપ્યા જપવિધિજ્ઞા ચ જપસિદ્ધિપ્રદાયિની ।
મન્ત્રશક્તિર્મન્ત્રવિદ્યા સુમન્ત્રા માન્ત્રિકપ્રિયા ॥ ૩૫॥

ઇન્દુમણ્ડલપીઠસ્થા સૂર્યમણ્ડલપીઠગા ।
ચન્દ્રશક્તિઃ સૂર્યશક્તિર્ગ્રહશક્તિર્ગ્રહાર્તિહા ॥ ૩૬॥

ગ્રહપીડાહરી સૌમ્યા શુભગ્રહફલપ્રદા ।
જ્યોતિર્મણ્ડલસંસ્થાના ગ્રહતારાધિદેવતા ॥ ૩૭॥

સપ્તવિંશતિયોગેશી બવાદિકરણેશ્વરી ।
પ્રભવાદ્યબ્દશક્તિશ્ચ કાલચક્રપ્રવર્તિની ॥ ૩૮॥

સોહંમન્ત્રજપાધારા ઊર્ધ્વષટ્ચક્રદેવતા ।
ઇડાખ્યા પિઙ્ગલાખ્યા ચ સુષુમ્ના બ્રહ્મરન્ધ્રગા ॥ ૩૯॥

શિવશક્તિઃ કુણ્ડલિની નાભિમણ્ડલનિદ્રિતા ।
યોગોદ્બુદ્ધા મુક્તિદાત્રી સહસ્રારાબ્જપીઠગા ॥ ૪૦॥

પીયૂષવર્ષિણી જીવશિવભેદતિનાશિની ।
નાભૌ પરા ચ પશ્યન્તી હૃદયે મધ્યમા ગલે ॥ ૪૧॥

જિહ્વાગ્રે વૈખરીવાણી પઞ્ચાશન્માતૃકાત્મિકા ।
ઓઙ્કારરૂપિણી શબ્દસૃષ્ટિરૂપાઽર્થરૂપિણી ॥ ૪૨॥

મૌનશક્તિર્મુનિધ્યેયા મુનિમાનસસંસ્થિતા ।
વ્યષ્ટિઃ સમષ્ટિસ્ત્રિપુટી તાપત્રયવિનાશિની ॥ ૪૩॥

ગાયત્રી વ્યાહૃતિઃ સન્ધ્યા સાવિત્રી ચ પિતૃપ્રસૂઃ ।
નન્દા ભદ્રા જયા રિક્તા પૂર્ણા વિષ્ટિશ્ચ વૈધૃતિઃ ॥ ૪૪॥

શ્રુતિઃ સ્મૃતિશ્ચ મીમાંસા વિદ્યાઽવિદ્યા પરાવરા ।
સુમેરુશ‍ૃઙ્ગનિલયા લોકાલોકનિવાસિની ॥ ૪૫॥

માનસોત્તરગોત્રસ્થા પુષ્કરદ્વીપદેવતા ।
મન્દરાદ્રિકૃતક્રીડા નીપોપવનવાસિની ॥ ૪૬॥

મણિદ્વીપકૃતાવાસા પીતવાસઃ સુપૂજિતા ।
પ્લક્ષાદિદ્વીપગોત્રસ્થા તત્રત્યજનપૂજિતા ॥ ૪૭॥

સુરાબ્ધિ દ્વીપનિલયા સુરાપાનપરાયણ ।
એકપાદેકહસ્તૈકદૃગેકશ્રુતિપાર્શ્વિકા ॥ ૪૮॥

અર્ધનારીશ્વરાર્ધાઙ્ગી સ્યૂતાલોકોત્તરાકૃતિઃ ।
ભક્તૈકભક્તિ સંસાધ્યા ધ્યાનાધારા પરાર્હણા ॥ ૪૯॥

પઞ્ચકોશાન્તરગતા પઞ્ચકોશવિવર્જિતા ।
પઞ્ચભૂતાતરાલસ્થા પ્રપઞ્ચાતીતવૈભવા ॥ ૫૦॥

પઞ્ચીકૃતમહાભૂતનિર્મિતાનેકભૌતિકા ।
સર્વાંતર્યામિણી શમ્ભુકામિની સિંહગામિની ॥ ૫૧॥

યામિનીકૃતસઞ્ચારા શાકિન્યાદિગણેશ્વરી ।
ખટ્વાઙ્ગિની ખેટકિની કુન્તિની ભિન્દિપાલિની ॥ ૫૨॥

વર્મિણી ચર્મિણી ચણ્ડી ચણ્ડમુણ્ડપ્રમાથિની ।
અનીકિની ચ ધ્વજિની મોહિન્યેજત્પતાકિની ॥ ૫૩॥

અશ્વિની ગજિની ચાટ્ટહાસિની દૈત્યનાશિની ।
શુમ્ભઘ્ની ચ નિશુમ્ભઘ્ની ધૂમ્રલોચનનાશિની ॥ ૫૪॥

બહુશીર્ષા બહુકુક્ષિર્વ્યાદિતાસ્યાઽશિતાસુરા ।
દંષ્ટ્રાસઙ્કટસંલગ્નદૈત્યસાસ્રાન્ત્ર માલિની ॥ ૫૫॥

દૈત્યાસૃઙ્માંસસન્તૃપ્તા ક્રવ્યાદકૃતવન્દના ।
લમ્બકેશી પ્રલમ્બોષ્ઠી લમ્બકુક્ષિર્મહાકટી ॥ ૫૬॥

લમ્બસ્તની લમ્બજિહ્વા લમ્બપાણ્યઙ્ઘ્રિજઙ્ઘિકા ।
લમ્બોરુર્લમ્બજઘના કાલિકા કર્કશાત્કૃતિઃ ॥ ૫૭॥

ભિન્નભેરીખરરવા વારણગ્રાસકારિણી ।

પ્રેતદેહપરીધાના રુણ્ડકુણ્ડલમણ્ડિતા ॥ ૫૮॥

ગણ્ડશૈલસ્પર્ધિગણ્ડા શૈલકન્દુકધારિણી ।
શિવદૂતી ઘોરરૂપા શિવાશતનિનાદિની ॥ ૫૯॥

નારાયણી જગદ્ધાત્રી જગત્પાત્રી જગન્મયી ।
અલ્લાંમ્બાક્કા કામદુઘાઽનલ્પદા કલ્પવલ્લિકા ॥ ૬૦॥

મલ્લીમતલ્લિકા ગુઞ્જાલઙ્કૃતિઃ શિવમોહિની ।
ગાન્ધર્વગાનરસિકા કેકાવાક્કીરપાલિની ॥ ૬૧॥

સિનીવાલી કુહૂ રાકાઽનુમતિઃ કૌમુદી કકુપ્ ।
બ્રહ્માણ્ડમણ્ડપસ્થૂણા બ્રહ્માણ્ડગૃહદેવતા ॥ ૬૨॥

મહાગૃહસ્થમહિષી પશુપાશવિમોચિની ।
વીરસ્થાનગતા વીરા વીરાસનપરિગ્રહા ॥ ૬૩॥

દીપસ્થાનગતા દીપ્તા દીપોત્સવકુતૂહલા ।
તીર્થપાત્રપ્રદા તીર્થકુમ્ભપૂજનસંભ્રમા ॥ ૬૪॥

માહેશ્વરજનપ્રીતા પશુલોકપરાઙ્મુખી ।
ચતુઃષષ્ટિમહાતન્ત્રપ્રતિપાદ્યાગમાધ્વગા ॥ ૬૫॥

શુદ્ધાચારા શુદ્ધપૂજ્યા શુદ્ધપૂજા જનાશ્રિતા ।
અષ્ટાદશમહાપીઠા શ્રીચક્રપરદેવતા ॥ ૬૬॥

યોગિનીપૂજનપ્રીતા યોગિનીચક્રવન્દિતા ।
રણત્કાઞ્ચીક્ષુદ્રઘણ્ટા ઘણ્ટાધ્વનિવિનોદિની ॥ ૬૭॥

તૌર્યત્રિકકલાભિજ્ઞા મનોજ્ઞા મઞ્જુભાષિણી ।
શિવવામાઙ્કલસિતા સુસ્મિતા લલિતાલસા ॥ ૬૮॥

લાવણ્યભૂમિસ્તલ્લેશનિર્મિતામરસુન્દરી ।
શ્રીર્ધીર્ભીર્હ્રીર્નતિર્જાતિરીજ્યાજ્યા પૂજ્યપાદુકા ॥ ૬૯॥

સુરસ્રવન્તી યમુના તથા ગુપ્તસરસ્વતી ।
ગોમતી ગણ્ડકી તાપી શતદ્રુશ્ચ વિપાશિકા ॥ ૭૦॥

સરયૂર્નર્મદા ગોદા પયોષ્ણી ચ પુનઃ પુના ।
ભીમા કૃષ્ણા તુઙ્ગભદ્રા નાનાતીર્થસ્વરૂપિણી ॥ ૭૧॥

દ્વારકા મધુરા માયા કાશ્યયોધ્યા ત્વવન્તિકા ।
ગયા કાઞ્ચી વિશાલા ચ મુક્તિક્ષેત્રસ્વરૂપિણી ॥ ૭૨॥

મન્ત્રદીક્ષા યાગદીક્ષા યોગદીક્ષાઽક્ષતવ્રતા ।
અક્ષમાલાવિભેદજ્ઞાઽઽસનભેદવિચક્ષણા ॥ ૭૩॥

માતૃકાન્યાસકુશલા મન્ત્રન્યાસવિશારદા ।
નાનામુદ્રાપ્રભેદજ્ઞા પઞ્ચોપાસ્તિપ્રભેદવિત્ ॥ ૭૪॥

સર્વમન્ત્રોપદેષ્ટ્રી ચ વ્યાખ્યાત્રી દેશિકોત્તરા ।
વાગ્વાદિની દુર્વિવાદિપ્રૌઢવાક્સ્તમ્ભકારિણી ॥ ૭૫॥

સ્વતન્ત્રયન્ત્રણાશક્તિસ્તદ્યન્ત્રિતજગત્ત્રયી ।
બ્રહ્માદ્યાકર્ષિણી શમ્ભુમોહિન્યુચ્ચાટિની દ્વિષામ્ ॥ ૭૬॥

સુરાસુરાણાં પ્રદ્વેષકારિણી દૈત્યમારિણી ।
પૂરિણી ભક્તકામાનાં શ્રિતપ્રત્યૂહવારિણી ॥ ૭૭॥

સાધારણી ધારિણી ચ પ્રૌઢવાગ્ધારિણી પ્રધૂઃ ।
પ્રભૂર્વિભૂઃ સ્વયમ્ભૂશ્ચ નિગ્રહાનુગ્રહક્ષમા ॥ ૭૮॥

ક્ષમાઽક્ષમા ક્ષમાધારા ધારાધરનિભદ્યુતિઃ ।
કાદમ્બિની કાલશક્તિઃ કર્ષિણી વર્ષિણીર્ષિણી ॥ ૭૯॥

અદેવમાતૃકા દેવમાતૃકા ચોર્વરા કૃષિઃ ।
કૃષ્ટપચ્યાઽકૃષ્ટપચ્યાઽનૂષરાઽધિત્યકા ગુહા ॥ ૮૦॥

ઉપત્યકા દરી વન્યાઽરણ્યાની શૈલનિમ્નગા ।
કેદારભૂમિર્વ્રીહિલા કમલર્ધિર્મહાફલા ॥ ૮૧॥

ઇક્ષુમત્યૂર્જિતા જમ્બૂપનસામ્રાદિશાલિની ।
અષ્ટાપદખની રૌપ્યખની રત્નખનિઃ ખનિઃ ॥ ૮૨॥

રુચાં ભાવખનિર્જીવખનિઃ સૌભાગ્યસત્ખનિઃ ।
લાવણ્યસ્ય ખનિર્ધૈર્યખનિઃ શૌર્યખનિઃ ખનિઃ ॥ ૮૩॥

ગામ્ભીર્યસ્ય વિલાસસ્ય ખનિઃ સાહિત્યસત્ખનિઃ ।
પક્ષમાસર્તુવર્ષાણાં ખનિઃ ખનિરનેહસામ્ ॥ ૮૪॥

ખનિશ્ચ યુગકલ્પાનાં સૂર્યચન્દ્રમસોઃ ખનિઃ ।
ખનિર્મનૂનામિન્દ્રાણાં ખનિઃ કૌતુકસત્ખનિઃ ॥ ૮૫॥

મષી લેખનિકા પાત્રી વર્ણપઙ્ક્તિર્લિપિઃ કથા ।
કવિતા કાવ્યકર્ત્રી ચ દેશભાષા જનશ્રુતિઃ ॥ ૮૬॥

રચના કલ્પનાઽઽચારભટી ધાટી પટીયસી ।
અપસવ્યલિપિર્દેવલિપી રક્ષોલિપિર્લિપિઃ ॥ ૮૭॥

તુલજા રામવરદા શબરી બર્બરાલકા ।
જ્યોતિર્લિઙ્ગમયી લિઙ્ગમસ્તકા લિઙ્ગધારિણી ॥ ૮૮॥

રુદ્રાક્ષધારિણી ભૂતિધારિણી લૈઙ્ગિકવ્રતા ।
વિષ્ણુવ્રતપરા વિષ્ણુમુદ્રિકા પ્રિયવૈષ્ણવી ॥ ૮૯॥

જૈની દૈગમ્બરી નાનાવિધવૈદિક માર્ગગા ।
પઞ્ચદ્રવિડસંસેવ્યા પઞ્ચગૌડસમર્ચિતા ॥ ૯૦॥

હિઙ્ગુલા શારદા જ્વાલામુખી ગઙ્ગાધિદેવતા ।
મન્દુરાદેવતાઽઽલાનદેવતા ગોષ્ઠદેવતા ॥ ૯૧॥

ગૃહાદિદેવતાસૌધદેવતોદ્યાનદેવતા ।
શૃઙ્ગારદેવતા ગ્રામદેવતા ચૈત્યદેવતા ॥ ૯૨॥

પૂર્દેવતા રાજસભાદેવતાઽશોકદેવતા ।
ચતુર્દશાનાં લોકાનાં દેવતા પરદેવતા ॥ ૯૩॥

વાપીકૂપતડાગાદિદેવતા વનદેવતા ।
સૃષ્ટિખેલા ક્ષેમખેલા પ્રતિસંહારખેલના ॥ ૯૪॥

પુષ્પપર્યઙ્કશયના પુષ્પવત્કુણ્ડલદ્વયી ।
તામ્બૂલચર્વણપ્રીતા ગૌરી પ્રથમપુષ્પિણી ॥ ૯૫॥

કલ્યાણીયુગસમ્પન્ના કામસઞ્જીવની કલા ।
કલાકલાપકુશલા કલાતીતા કલાત્મિકા ॥ ૯૬॥

મહાજાઙ્ગલકી કાલભુજઙ્ગવિષનાશિની ।
ચિકિત્સા વૈદ્યવિદ્યા ચ નાનામયનિદાનવિત્ ॥ ૯૭॥

પિત્તપ્રકોપશમની વાતઘ્ની કફનાશિની ।
આમજ્વરપ્રકોપઘ્ની નવજ્વરનિવારિણી ॥ ૯૮॥

અર્શોઘ્ની શૂલશમની ગુલ્મવ્યાધિનિવારિણી ।

ગ્રહણીનિગ્રહકરી રાજયક્ષ્મવિનાશિની ॥ ૯૯॥

મેહઘ્ની પાણ્ડુરોગઘ્ની ક્ષયાપસ્મારનાશિની ।
ઉપદંશહરી શ્વાસકાસચ્છર્દિનિવારિણી ॥ ૧૦૦॥

પ્લીહપ્રકોપસંહર્ત્રી પામાકણ્ડૂવિનાશિની ।
દદ્રુકુષ્ઠાદિરોગઘ્ની નાનારોગવિનાશિની ॥ ૧૦૧॥

યક્ષરાક્ષસવેતાલકૂષ્માડગ્રહભેદિની ।
બાલગ્રહઘ્ની ચણ્ડાલગ્રહચણ્ડગ્રહાર્દિની ॥ ૧૦૨॥

ભૂતપ્રેતપિશાચઘ્ની નાનાગ્રહવિમર્દિની ।
શાકિનીડાકિનીલામદસ્ત્રીગ્રહનિષૂદિની ॥ ૧૦૩॥

અભિચારકદુર્બાધોન્મથિન્યુન્માદનાશિની ।
નાનાવિષાર્તિસંહર્ત્રી દુષ્ટદૃષ્ટ્યાર્તિનાશિની ॥ ૧૦૪॥

દુષ્ટસ્થાનસ્થિતાર્કાદિગ્રહપીડાવિનાશિની ।
યોગક્ષેમકરી પુષ્ટિકરી તુષ્ટિકરીષ્ટદા ॥ ૧૦૫॥

ધનદા ધાન્યદા ગોદા વાસોદા બહુમાનદા ।
કામિતાર્થપ્રદા શન્દા ચતુર્વિધતુમર્થદા ॥ ૧૦૬॥

બ્રહ્મમાન્યા વિષ્ણુમાન્યા શિવમાન્યેન્દ્રમાનિતા ।
દેવર્ષિમાન્યા બ્રહ્મર્ષિમાન્યા રાજર્ષિમાનિતા ॥ ૧૦૭॥

જગન્માન્યા જગદ્ધાત્રી ત્ર્યમ્બકા ત્ર્યમ્બકાઙ્ગના ।
ગુહેભવક્ત્રજનની ભદ્રકાલ્યમયઙ્કરી ॥ ૧૦૮॥

સતી દાક્ષાયણી દક્ષા દક્ષાધ્વરનિષૂદિની ।
ઉમા હિમાદ્રિજાડપર્ણા કર્ણપૂરાઞ્ચિતાનના ॥ ૧૦૯॥

ક્ષોણીધરનિતમ્બામ્બા બિમ્બાભરદનચ્છદા ।
કુન્દકોરકનીકાશરદપઙ્ક્તિઃ સુનાસિકા ॥ ૧૧૦॥

નાસિકામૌક્તિકમણિપ્રભામલરદચ્છદા ।
સુમન્દહસિતાલોકવિમુહ્યચ્છમ્ભુ માનસા ॥ ૧૧૧॥

માનસૌકોગતિઃ સિઞ્જન્મઞ્જીરાદિવિભૂષણા ।
કાઞ્ચીક્કણત્ક્ષુદ્રઘણ્ટા કલધૌતઘટસ્તની ॥ ૧૧૨॥

મુક્તાવિદ્રુમહારશ્રીરાજત્કુચતટસ્થલી ।
તાટઙ્કયુગસત્કાન્તિવિલસદ્ગણ્ડદર્પણા ॥ ૧૧૩॥

ધમ્મિલ્લપ્રોત સૌવર્ણકેતકીદલમણ્ડિતા ।
શિવાર્પિતસ્વલાવણ્યતારુણ્યકિલિકિઞ્ચિતા ॥ ૧૧૪॥

સગ્રૈવેયકચિન્તાકવિભ્રાજત્કમ્બુકન્ધરા ।
સખીસ્કન્ધાસક્તબાહુલતાસુલલિતાઙ્ગિકા ॥ ૧૧૫॥

નિતમ્બકુચભારાર્તકૃશમધ્યસુમધ્યમા ।
નાભીસરોવરોદ્ભૂતરોમાવલિવિરાજિતા ॥ ૧૧૬॥

ત્રિવલીરાજલલિતગૌરવર્ણતલોદરી ।
ચામરગ્રાહિણીવીજ્યમાનેન્દુદ્યુતિચામરા ॥ ૧૧૭॥

મહાકુરબકાશોકપુષ્પવચયલાલસા ।
સ્વતપઃસુફલીભૂતવરોત્તમમહેશ્વરી ॥ ૧૧૮॥

હિમાચલતપઃપુણ્યફલભૂતસુતાકૃતિઃ ।
ત્રૈલોક્યરમણીરત્ના શિવચિચ્ચન્દ્રચન્દ્રિકા ॥ ૧૧૯॥

કીર્તિજ્યોત્સ્નાધવલિતાનેકબ્રહ્માણ્ડગોલિકા ।
શિવજીવાતુગુલિકાલસદઙ્ગુલિમુદ્રિકા ॥ ૧૨૦॥

પ્રીતિલાલિતસત્પુત્રગજાનનષડાનના ।
ગઙ્ગાસાપત્ન્યજનિતેર્ષ્યાયતેક્ષણશોણિમા ॥ ૧૨૧॥

શિવવામાઙ્કપર્યઙ્કકૃતાસનપરિગ્રહા ।
શિવદૃષ્ટિચકોરીષ્ટમુખપૂર્ણેન્દુમણ્ડલા ॥ ૧૨૨॥

ઉરોજશૈલયુગલભ્રમચ્છિવમનોમૃગા ।
બ્રહ્મવિષ્ણુમુખાશેષવૃન્દારકનભસ્કૃતા ॥ ૧૨૩॥

અપાઙ્ગાઙ્ગણસન્તિષ્ઠન્નિગ્રહાનુગ્રહદ્વયી ।
સનત્કુમારદુર્વાસઃ પ્રમુખોપાસકાર્થિતા ॥ ૧૨૪॥

હાદિકૂટત્રયોપાસ્યા કાદિકૂટત્રયાર્ચિતા ।
મૃદ્વીકમધુપાનાદ્યુદ્બોધઘૂર્ણિતલોચના ॥ ૧૨૫॥

અવ્યક્તભાષણા ચેટીદત્તવીટીગ્રહાલસા ।
ગાયન્તી વિલસન્તી ચ લિખન્તી પ્રિયલેખના ॥ ૧૨૬॥

ઉલ્લસન્તી લસન્તી ચ દોલાન્દોલનતુષ્ટિભાક્ ।
વિપઞ્ચીવાદનરતા સપ્તસ્વરવિભેદવિત્ ॥ ૧૨૭॥

ગન્ધર્વીકિન્નરીવિદ્યાધરીયક્ષસુરીનુતા ।
અમરીકબરીભૃઙ્ગીસ્થગિતાઙ્ઘ્રિસરોરુહા ॥ ૧૨૮॥

ગન્ધર્વગાનશ્રવણાનન્દાન્દોલિતમસ્તકા ।
તિલોત્તમોર્વશીરમ્ભાનૃત્યદર્શનજાતમુત્ ॥ ૧૨૯॥

અચિન્ત્યમહિમાऽચિન્ત્યગરિમાऽચિન્ત્યલાઘવા ।
અચિન્ત્યવિભવાऽચિન્ત્યવિક્રમાऽચિન્ત્યસદ્ગુણા ॥ ૧૩૦॥

સ્તુતિઃ સ્તવ્યા નતિર્નમ્યા ગતિર્ગમ્યા મહાસતી ।
અનસૂયાऽરુન્ધતી ચ લોપામુદ્રાऽદિતિર્દિતિઃ ॥ ૧૩૧॥

સપ્તસંસ્થાસ્વરૂપા ચારણિઃ સ્રુગ્વેદિકા ધ્રુવા ।
ઇડા પ્રણીતા પાત્રી ચ સ્વધાસ્વાહાऽऽહુતિર્વપા ॥ ૧૩૨॥

કવ્યરૂપા હવ્યરૂપા યજ્ઞપાત્રસ્વરૂપિણી ।
શઙ્કરાહોપુરુષિકા ગાયત્રીગર્ભવલ્લભા ॥ ૧૩૩॥

ચતુર્વિંશત્યક્ષરાત્મપરોરજસિસાવદોમ્ ।
વેદપ્રસૂર્વેદગર્ભા વિશ્વામિત્રર્ષિપૂજિતા ॥ ૧૩૪॥

ઋગ્યજુઃ સામત્રિપદા મહાસવિતૃદેવતા ।
દ્વિજત્વસિદ્ધિદાત્રી ચ સાઙ્ખ્યાયનસગોત્રિકા ॥ ૧૩૫॥

ગાતૃદુર્ગતિસંહર્ત્રી ચ ગાતૃસ્વર્ગાપવર્ગદા ।
ભૃગુવલ્લી બ્રહ્મવલ્લી કઠવલ્લી પરાત્પરા ॥ ૧૩૬॥

કૈવલ્યોપનિષદ્બ્રહ્મોપનિષન્મુણ્ડકોપનિષત્ ।
છાન્દોગ્યોપનિષચ્ચૈવ સર્વોપનિષદાત્મિકા ॥ ૧૩૭॥

તત્ત્વમાદિમહાવાક્યરૂપાખણ્ડાર્થબોધકૃત્ ।
ઉપક્રમાદિષડ્લિઙ્ગમહાતાત્પર્યબોધિની ॥ ૧૩૮॥

જહત્સ્વાર્થાજહત્સ્વાર્થભાગત્યાગાખ્યલક્ષણા ।
અસત્ખ્યાતિશ્ચ સત્ખ્યાતિર્મિથ્યાખ્યાતિઃ પ્રભાऽપ્રભા ॥ ૧૩૯॥

અસ્તિભાતિપ્રિયાત્મા ચ નામરૂપસ્વરૂપિણી ।

ષણ્મતસ્થાપનાચાર્યમહાદેવકુટુમ્બિની ॥ ૧૪૦॥

ભ્રાન્તિર્ભ્રાન્તિહરી ભ્રાન્તિદાયિની ભ્રાન્તિકારિણી ।
વિકૃતિર્નિકૃતિશ્ચાપિ કૃતિશ્ચોપકૃતિસ્તથા ॥ ૧૪૧॥

સકૃતિઃ સત્કૃતિઃ પાપકૃતિઃ સુકૃતિરુત્કૃતિઃ ।
આકૃતિર્વ્યાકૃતિઃ પ્રાયશ્ચિત્તિર્વિત્તિઃ સ્થિતિર્ગતિઃ ॥ ૧૪૨॥

નવકુણ્ડી પઞ્ચકુણ્ડી ચતુષ્કુણ્ડ્યેકકુણ્ડિકા ।
દેવસેનાદૈત્યસેનારક્ષઃ સેનાદિભેદભાક્ ॥ ૧૪૩॥

મહિષાસ્યોદ્ધતોદ્દણ્ડદૈત્યવેતણ્ડરુણ્ડહૃત્ ।
દૈત્યસેનાતૃણારણ્યજ્વાલા જ્યોતિઃસ્વરૂપિણી ॥ ૧૪૪॥

ચણ્ડમુણ્ડ મહાદૈત્યરુણ્ડડકન્દુકખેલકૃત્ ।
પશુદેહાસૃક્પલલતૃપ્તા દક્ષિણકાલિકા ॥ ૧૪૫॥

તદઞ્ચત્પ્રેતતદ્રુણ્ડમાલા વ્યાલવિભૂષણા ।
હલદંષ્ટ્રા શઙ્કુરદા પીતાનેકસુરાઘટા ॥ ૧૪૬॥

નેત્રભ્રમિપરાભૂતરથચક્રદ્વયભ્રમિઃ ।
વ્યાયામાગ્રાહ્યવક્ષોજન્યક્કૃતેભેન્દ્રકુમ્ભિકા ॥ ૧૪૭॥

માતૃમણ્ડલમધ્યસ્થા માતૃમણ્ડલપૂજિતા ।
ઘણ્ટાઘણઘણધ્વાનપ્રીતા પ્રેતાસનસ્થિતા ॥ ૧૪૮॥

મહાલસા ચ માર્તણ્ડભૈરવપ્રાણવલ્લભા ।
રાજવિદ્યા રાજસતી રાજસ્ત્રી રાજસુન્દરી ॥ ૧૪૯॥

ગજરાજાદિરલકાપુરીસ્થા યક્ષદેવતા ।
મત્સ્યમૂર્તિઃ કૂર્મમૂર્તિઃ સ્વીકૃતક્રોડવિગ્રહા ॥ ૧૫૦॥

નૃસિંહમૂર્તિરત્યુગ્રા ધૃતવામનવિગ્રહા ।
શ્રીજામદગ્ન્યમૂર્તિશ્ચ શ્રીરામમૂર્તિર્હતાસ્રપા ॥ ૧૫૧॥

કૃષ્ણમૂર્તિર્બુદ્ધમૂર્તિઃ કલ્કિમૂર્તિરમૂર્તિકા ।
વિરાણ્મૂર્તિર્જગન્મૂર્તિર્જગજ્જન્માદિકારિણી ॥ ૧૫૨॥

આધારાધેયસમ્બન્ધહીના તદુભયાત્મિકા ।
નિર્ગુણા નિષ્ક્રિયાઽસઙ્ગા ધર્માધર્મવિવર્જિતા ॥ ૧૫૩॥

માયાસમ્બન્ધરહિતાસચ્ચિદાનન્દવિગ્રહા ।
જગત્તરઙ્ગજલધિરૂપા ચીત્કૃતિભેદભાક્ ॥ ૧૫૪॥

મહાતત્ત્વાત્મિકા વૈકારાહઙ્કારસ્વરૂપિણી ।
રજોહઙ્કારરૂપા ચ તમોહઙ્કારરૂપિણી ॥ ૧૫૫॥

આકાશરૂપિણી વાયુરૂપિણ્યગ્નિસ્વરૂપિણી ।
અમ્બાત્મિકા ભૂસ્વરૂપા પઞ્ચજ્ઞાનેન્દ્રિયાત્મિકા ॥ ૧૫૬॥

કર્મેન્દ્રિયાત્મિકા પ્રાણાપાનવ્યાનાદિરૂપિણી ।
નાગકૂર્માદિરૂપા ચ સર્વનાડીવિહારિણી ॥ ૧૫૭॥

આધારચક્રાધિષ્ઠાત્રી સ્વાધિષ્ઠાનપ્રતિષ્ઠિતા ।
મણિપૂરકસંસ્થાનાઽનાહતાબ્જાધિદેવતા ॥ ૧૫૮॥

વિશુદ્ધચક્રપીઠસ્થાઽઽજ્ઞાચક્રપરમેશ્વરી ।
દ્વિપત્રી ષોડશદલી તથા દ્વાદશપત્રિકા ॥ ૧૫૯॥

પ્રદલદ્દશપત્રી ચ ષડ્દલી ચ ચતુર્દલી ।
વાસાન્તમાતૃકા બાદિલાન્તવર્ણાધિદેવતા ॥ ૧૬૦॥

ડાદિફાન્તાક્ષરવતી કાદિઠાન્તાક્ષરેશ્વરી ।
ષોડશસ્વરબીજેશી સ્પર્શોષ્માન્તઃસ્થદેવતા ॥ ૧૬૧॥

હક્ષાક્ષરદ્વયીરૂપા પઞ્ચાશન્માતૃકેશ્વરી ।
સહસ્રારાબ્જપીઠસ્થા શિવશક્તિર્વિમુક્તિદા ॥ ૧૬૨॥

પઞ્ચામ્નાયશિવપ્રોક્તા મન્ત્રબીજાધિદેવતા ।
સૌઃક્લીંહ્રીંબીજફલદા મહાપ્લક્ષસરસ્વતી ॥ ૧૬૩॥

નવાર્ણવા સપ્તશતી માલામન્ત્રસ્વરૂપિણી ।
અર્ગલેશી કીલકેશી કવચેશી ત્રિમૂર્તિકા ॥ ૧૬૪॥

સકારાદિહકારાન્તમહમન્ત્રાધિદેવતા ।
સકૃત્સપ્તશતીપાઠપ્રીતા પ્રોક્તફલપ્રદા ॥ ૧૬૫॥

કુમારીપૂજનોદ્યન્મુચ્ચિરણ્ટીપૂજનોત્સુકા ।
વિપ્રપૂજનસન્તુષ્ટા નિત્યશ્રીર્નિત્યમઙ્ગલા ॥ ૧૬૬॥

જયદાદિમચારિત્રા શ્રીદ મધ્યચરિત્રિકા ।
વિદ્યાદોત્તમચારિત્રા કામિતાર્થપ્રદાયિકા ॥ ૧૬૭॥

ઇષ્ટકૃષ્ણાષ્ટમી ચેષ્ટનવમી ભૂતપૂર્ણિમા ।
ઇષ્ટશુક્રારદિવસા ધૂતદીપદ્વયોત્સુકા ॥ ૧૬૮॥

નવરાત્રોત્સવાસક્તા પૂજાહોમબલિપ્રિયા ।
ઇષ્ટેક્ષુકૂષ્માણ્ડફલાહૂતિરિષ્ટફલાહુતિઃ ॥ ૧૬૯॥

પ્રતિમાસૂત્કૃષ્ટપુણ્યા ચ મહાયન્ત્રાર્ચનાવિધિઃ ।
કાત્યાયની કામદોગ્ધ્રી ખેચરી ખડ્ગચર્મધૃક્ ॥ ૧૭૦॥

ગજાસ્યમાતા ઘટિકા ચણ્ડિકા ચક્રધારિણી ।
છાયા છવિમયી છન્ના જરામૃત્યુવિવર્જિતા ॥ ૧૭૧॥

ઝલ્લીઝઙ્કારમુદિતા ઝઞ્ઝાવાતઝણત્કૃતિઃ ।
ટઙ્કહસ્તા ટણચ્ચાપઠદ્વયી પલ્લવોન્મનુઃ ॥ ૧૭૨॥

ડમરુધ્વાનમુદિતા ડાકિનીશાકિનીશ્વરી ।
ઢુણ્ઢિરાજસ્ય જનની ઢકાવાદ્યવિલાસિની ॥ ૧૭૩॥

તરિકા તારિકા તારા તન્વઙ્ગી તનુમધ્યમા ।
ધૂપીકૃતાસુરા દીર્ઘવેણી દૃપ્તા સુરાર્તિહૃત્ ॥ ૧૭૪॥

ધૂમ્રવર્ણા ધૂમ્રકેશી ધૂમ્રાક્ષપ્રાણહારિણી ।
નગેશતનયા નારી મતલ્લી પટ્ટિહેતિકા ॥ ૧૭૫॥

પાતાલલોકાધિષ્ઠાત્રી ફેરૂકૃતમહાસુરા ।
ફણીન્દ્રશયના બોધદાયિની બહુરૂપિણી ॥ ૧૭૬॥

ભામિની ભાસિની ભ્રાન્તિકરી ભ્રાન્તિવિનાશિની ।
માતઙ્ગી મદિરામત્તા માધવી માધવપ્રિયા ॥ ૧૭૭॥

યાયજૂકાર્ચિતા યોગિધ્યેયા યોગીશવલ્લભા ।
રાકાચન્દ્રમુખી રામા રેણુકા રેણુકાત્મજા ॥ ૧૭૮॥

લોકાક્ષી લોહિતા લજ્જા વામાક્ષી વાસ્તુશાન્તિદા ।
શાતોદરી શાશ્વતિકા શાતકુમ્ભવિભૂષણા ॥ ૧૭૯॥

ષડાસ્યમાતા ષટ્ચક્રવાસિની સર્વમઙ્ગલા ।
સ્મેરાનના સુપ્રસન્ના હરવામાઙ્કસંસ્થિતા ॥ ૧૮૦॥

હારિવન્દિતપાદાબ્જા હ્રીંબીજભુવનેશ્વરી ।

ક્ષૌમામ્બરેન્દુગોક્ષીરધવલા વનશઙ્કરી ॥ ૧૮૧॥

(॥ ષડઙ્ગન્યાસધ્યાન માનસોપચાર પૂજનમ્ ॥)

અથ ફલશ્રુતિઃ ।
ઇતીદં વનશઙ્કર્યાઃ પ્રોક્તં નામસહસ્રકમ્ ।
શાન્તિદં પુષ્ટિદં પુણ્યં મહાવિપત્તિનાશનમ્ ॥ ૧॥

દારિદ્ર્યદુઃખશમનં નાનારોગનિવારણમ્ ।
ઇદં સ્તોત્રં પઠેદ્ભક્ત્યા યસ્ત્રિસન્ધ્યં નરઃ શુચિઃ ॥ ૨॥

નારી વા નિયતા ભક્ત્યા સર્વાન્કામાનવાપ્નુયાત્ ।
અસ્ય સ્તોત્રસ્ય સતતં યત્ર પાઠઃ પ્રવર્તતે ॥ ૩॥

તસ્મિન્નગૃહે મહાલક્ષ્મીઃ સ્વભર્ત્રા સહ મોદતે ।
નાનેન સદૃશં સ્તોત્રં ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૪॥

વિદ્યતેઽન્યસત્યમેતત્ શક્ર વચ્મિ પુનઃ પુનઃ ।
બકવન્ધ્યા કાકવન્ધ્યા નારીસ્તોત્રમિદં પઠેત્ ॥ ૫॥

વર્ષેણૈકેન સા પુત્રં લભેન્નાત્રાસ્તિ સંશયઃ ।
સામાન્યકાર્યસિદ્ધિસ્તુ શતાવર્તનતો ભવેત્ ॥ ૬॥

મહાકાર્યસ્ય સિદ્ધિસ્તુ સહસ્રાવર્તનાદ્ધ્રુવમ્ ।
ન તત્ર પીડા જાયેત ભૂતપ્રેતગ્રહોદ્ભવા ॥ ૭॥

લોકવશ્યં રાજવશ્યં સ્તોત્રસ્ય પઠનાદ્ભવેત્ ।
શત્રવઃ સંક્ષયં યાન્તિ દસ્યવઃ પિશુનાસ્તથા ॥ ૮॥

નૈવ શાકમ્ભરીભક્તાઃ સીદન્તિ બલસૂદન ।
શાકમ્ભરી સ્વભક્તાનામવિત્રી જનની યથા ॥ ૯॥

યદ્યત્કાર્યં સમુદ્દિશ્ય ધ્યાયન્ શાકમ્ભરીં હૃદિ ।
સ્તોત્રમેતત્પઠેત્તસ્ય તત્કાર્યં ચ પ્રસિદ્ધ્યતિ ॥ ૧૦॥

મુચ્યતે બન્ધનાદ્બદ્ધો રોગી મુચ્યેત રોગતઃ ।
ઋણવાનૃણતો મુચ્યેન્નાત્ર કાર્યા વિચારણા ॥ ૧૧॥

પૌષે માસિ સિતે પક્ષે પ્રારભ્ય તિથિમષ્ટમીમ્ ।
દેવ્યાઃ આરાધનં કુર્યાદન્વહં પૂર્ણિમાવધિ ॥ ૧૨॥

સશાકૈરુત્તમાન્નૈશ્ચ બ્રાહ્મણાંશ્ચ સુવાસિનીઃ ।
સન્તર્પયેદ્યથાશક્તિ દેવીં સમ્પૂજ્ય ભક્તિતઃ ॥ ૧૩॥

વિત્તશાઠ્યં ન કુર્વીત શાકમ્ભર્યાઃ સમર્ચને ।
તસ્મૈ પ્રસન્ના ભક્તાય દદ્યાત્કામાનભીપ્સિતાન્ ॥ ૧૪॥

વિદ્યાર્થી પ્રાપ્નુયાદ્વિદ્યાં ધનાર્થી ચાપ્નુયાદ્ધનમ્ ।
દારાર્થી પ્રાપ્નુયાદ્દારાનપત્યાર્થી તદાપ્નુયાત્ ॥ ૧૫॥

આપ્નુયાન્મન્દબુદ્ધિસ્તુ ગ્રન્થધારણપાટવમ્ ।
અસ્ય સ્તોત્રસ્ય પાઠેન પ્રાપ્નુયાદ્યદ્યદીપ્સિતમ્ ॥ ૧૬॥

અયુતાવર્તનાદસ્ય સ્તોત્રસ્ય બલસૂદન ।
પશ્યેચ્છાકમ્ભરીં સાક્ષાત્તદ્ભક્તો નાત્ર સંશયઃ ॥ ૧૭॥

હોમં ચ કુર્યાદ્વિધિવત્પાયસેન સસર્પિષા ।
સૌભાગ્યદ્રવ્યયુક્તેન સેક્ષુકૂષ્માણ્ડકેન ચ ॥ ૧૮॥

સુવાસિનીઃ કુમારીશ્ચ બ્રાહ્મણાંશ્ચ દિને દિને ।
સમ્ભોજયેત્સદન્નેન સસિતામધુસર્પિષા ॥ ૧૯॥

દદ્યાત્તેભ્યશ્ચ તાભ્યશ્ચ વસ્ત્રાલઙ્કારદક્ષિણાઃ ।
તસ્મૈ શાકમ્ભરી દદ્યાત્પુરુષાર્થચતુષ્ટયમ્ ॥ ૨૦॥

આચન્દ્રાર્કં તસ્ય વશઃ સ્થાસ્યત્યત્ર ગુણી સુખી ।
શાકમ્ભર્યૈ નમ ઇતિ યસ્તુ મન્ત્રં ષડક્ષરમ્ ॥ ૨૧॥

ભક્ત્યા જપેન્નરસ્તસ્ય સર્વત્ર જયમઙ્ગલમ્ ।
શાકમ્ભર્યા ઇદં શક્ર દિવ્યં નામસહસ્રકમ્ ॥ ૨૨॥

ગુરુભક્તાય શાન્તાય દેયં શ્રદ્ધાલવે ત્વયા ।
ત્વમપ્યાખણ્ડલ સદા પઠેદં સ્તોત્રમુત્તમમ્ ॥ ૨૩॥

શત્રૂન્ જેષ્યસિ સઙ્ગ્રામે સર્વાન્કામાનવાપ્સ્યસિ ।
ઇતિ શ્રુત્વા સ્કન્દવાક્યં શક્રઃ સન્તુષ્ટમાનસઃ ॥ ૨૪॥

પ્રણમ્ય ગુહમાપૃષ્ટ્વા સગણઃ સ્વદિવં યયૌ ॥ ૨૫॥

સૂત ઉવાચ -
દુર્ભિક્ષે ઋષિપોષિણ્યાઃ શાકમ્ભર્યાઃ પ્રકીર્તિતમ્ ।
ઇદં નામસહસ્રં વઃ કિં ભૂયઃ શ્રોતુમિચ્છથ ॥ ૨૬॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે શાકમ્ભરી તથા વનશઙ્કરી સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by DPD, Help from Alex

Proofread by DPD, NA

---

*Shri shAkambharI tathA vanasha NkarI Sahasranamastotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*